## निपानमाहावः। (७४/३२८१)

[1]आङ पूर्वस्य ह्वयतेर्धातोः सम्प्रसारणम्, अप्प्रत्ययो, वृद्धिश्च निपात्यते निपानं चेदभिधेयं भवति। निपिबन्त्यस्मिन्निति निपानमुदकाधार उच्यते। आहावः पशूनाम्। [2]कूपोपसरेषु य उदकाधारस्तत्र हि [3]पानाय पशव आहूयन्ते। निपानम् इति किम्? आह्वायः॥

## भावेऽनुपसर्गस्य। (७५/३२८२)

अनुपसर्गस्य ह्वयतेः [4]सम्प्रसारणम् अप् प्रत्ययश्च भवति भावे अभिधेये। हवः। 'हवे॑ हवे सु॒हवं॒ शूर॒मिन्द्र॑म्' (ऋ. ६.७.११)। अनुपसर्गस्य इति किम्? आह्वायः। भावग्रहणम् 'अकर्तरि च कारके सञ्ज्ञायाम्' (३.३.१९/३१८८) [5] इत्यस्य निरासार्थम्॥

## हनश्च वधः। (७६/३२८३)

भावेऽनुपसर्गस्य इति वर्तते। हन्तेर्धातोः [6]अनुपसर्गे भावे अप् प्रत्ययो भवति, तत्संनियोगेन च [7]वधादेशः, स चान्तोदात्तः। तत्रोदात्तनिवृत्तिस्वरेण [8]अप उदात्तत्वं [9]भवति। वधश्चोराणाम्। वधो दस्यूनाम्। भावे इत्येव, घातः। अनुपसर्गस्य इत्येव, [10]प्रघातः, विघातः। चकारो भिन्नक्रमत्वान् नादेशेन सम्बध्यते। किं तर्हि? प्रकृतेन प्रत्ययेन। [11]अप् च, यश्चापरः प्राप्नोति। तेन घञपि भवति। घातो वर्तते॥

## मूर्तौ घनः। (७७/३२८४)

[12]हनः इत्येव। मूर्तिः काठिन्यम्। मूर्तौ [13]अभिधेयायां हन्तेः अप् प्रत्ययो भवति, [14]घनश्चादेशः। [15]अभ्रघनः। दधिघनः। [16]कथं घनं दधि इति? धर्मशब्देन धर्मी भण्यते॥

## अन्तर्घनो देशे। (७८/३२८५)

अन्तः[17]पूर्वात् हन्तेः अप् प्रत्ययो [18]भवति, घनादेशश्च [19]भवति देशेऽभिधेये। अन्तर्घनः[20]। सञ्ज्ञीभूतो [21]वाहीकेषु देशविशेष उच्यते। अन्ये [22]णकारं पठन्ति अन्तर्घणो [23]देशः इति। तदपि ग्राह्यमेव। देशे इति किम्? अन्तर्घातोऽन्यः[24]॥

---

1. ह्वयतेः इत्येव इत्यधिकम् ब. 2. कूपोपसमीपे फ. 3. निपानाय ब. ह. 4. धातोः इत्यधिकम् ब. 5. इत्यस्य नास्ति फ. 6. अनुपसर्गात् क. ह. 7. वध इत्यादेशः भवति ह. 8. यः प्रत्ययः तस्यावृतत्वं ब. 9. भवति नास्ति क. ह. 10. आघातः ब. क. ड. फ. 11. अप् प्रत्ययः क. 12. हनः इत्येव नास्ति अ. ग. फ. 13. अभिधेये ह. 14. घनशब्दः आदेशः ब. क. फ. 15. अभिघनः ह. 16. कथं नास्ति फ. 17. पूर्वपदात् ह. 18–19. भवति नास्ति ह. 20. इति इत्यधिकम् ग. 21. बाह्लीकेषु ग. 22. णकारान्तम् फ. 23. देशः नास्ति फ. 24. इति इत्यधिकम् ह.